**अपपाठ** पु० अपकृष्टः पाठः । यथा यस्य पाठः समुचितः ततोऽन्यथा पाठे अपकृष्टपाठे "द्वादशापपाठा अस्य जाता इति" सि०कौ० ।

**अपपात्र** त्रि० अपकृष्टं पात्रं भोजनपात्रं यस्य । चण्डालौ तेषां हि भोजने पात्राणामपकृष्टत्वं तत्रान्यैर्भोजनानर्हत्वात्तेषां तथात्वम् "चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः अपपात्राश्च कर्त्तव्या इति" मनुः ।

**अपबर्हिस्** त्रि० अपगतं बर्हिर्यत्र प्रा०ब० वा गतलोपः । बर्हिर्होमरहिते "सोऽपबर्हिषौ द्वावनुयाजौ" इति श्रुतिः । "अपबर्हिषश्चतुरः प्रयाजान् यजति" । शत० ब्रा० । अपबर्हिष इति पृथक्पदमित्येके ।

**अपभय** त्रि० अपगतं भयं यस्य प्रा०ब० वा गतलोपः । गतभये भीतिशून्ये । लोपाभावे अपगतभयोऽप्युक्तार्थे त्रि० ।

**अपभर्त्तृ** पु० अपकृष्टो भर्त्ता प्रा०स० । अपकृष्टभर्त्तरि

**अपभी** त्रि० अपगता भीरस्य प्रा०ब० वा गतलोपः । भीतिशून्ये अपभीतिरप्यत्र स्त्री ।

**अपभूति** स्त्री अपकृष्टा भूतिः प्रा०स० । "अपकृष्टविभूतौ "यममी पुरोदधिरे ब्राह्मणमपभूतये" इति श्रुतिः ।

**अपभ्रंश** पु० अप+भ्रन्श–घञ् । अपसरणे अधःपतने "अत्याहृङ्‌भिर्भवति महतामप्यपभ्रंशनिष्ठा" शकु० । "अपभ्रंशति स्वभावात् प्रच्यवते" अप+भ्रन्श–कर्त्तरि अच् । साधुशब्दस्य शक्तिवैफल्यप्रयुक्तान्यथाच्चारणयुक्ते अपशब्दे । "त एव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हरिणा साधुशब्दानामेवान्यथोच्चारणेऽपशब्दतोक्तेः तस्य स्वभावतो भ्रंशात् तथात्वम् । "अनपभ्रंशतानादिर्यदाभ्युदययोग्यतेति" हरिः । "आभीरादिगिरः काव्येष्वपभ्रंशगिरः स्मृताः । शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितमिति" दण्डी ।

**अपम** त्रि० अपकृष्टं मीयते अप+ मा–बा० क । अपकृष्टतया ज्ञाते "भगोऽन्याघोऽश्विदविताऽपमस्य चित्" । ऋ० १०, २९,३ । "अपमस्य जात्यातिनिकृष्टस्य" भा० । अपक्रम्य भूगोलादुपरि मीयते । भूगोलानाच्छादितान्तरिक्षभागे ज्योतिषपरिभाषितायां सूर्यादिगत्यर्थतिर्य्यग्रेखायाम् क्रान्तौ यथा । "नाडिकामण्डलात् तिर्य्यगवापमः, क्रान्तिवृत्तावधिः क्रान्तिवृत्ताच्छरः । विक्षेपवृत्तावधिस्तिर्य्यगेवं स्फुटो नाडिकावृत्तखेटान्तरालेऽपमः" इति सि०शि० । "क्रान्तिवृत्ते यत् स्फुटग्रहस्थानं तस्य नाडीवृत्तात् तिर्य्यगन्तरम् अपमः क्रान्तिः । अथ विमण्डले यत् ग्रहस्थानं तस्य क्रान्तिवृत्तात् यत् तिर्य्यगन्तरं स विक्षेपः अथ विमण्डलस्य प्राक् च नाडीवृत्तात् यत् तिर्य्यगन्तरम् सः अपमः स्फुटा क्रान्तिः ग्रहस्य उत्तरतो याम्यदिशं याम्यान्तात् तदनु सौम्यदिग्भागम् । प्रमि० "परिसरतां गगनसदां चलनं किञ्चिद्भवेदपमः" इति । सि०शि० ।

**अपमज्या** स्त्री अपमस्य धनुराकृतिक्षेत्रस्य ज्येव । क्रान्तिवृत्तार्द्धजीवायाम् । विवरणम् क्रान्तिज्याशब्दे दृश्यम् ।

**अपमण्डल** न० अपक्रान्तं मण्डलात् भूमण्डलात् निरा०त० । सिद्धान्तशिरोमण्युक्ते क्रान्तिवृत्ते । यथा "ग्रहस्य गोले कथिताऽपमण्डलं प्रकल्प्य कक्षावलयं यथोदितमिति" "क्रान्तिवृत्तं कक्षामण्डलं प्रकल्प्येति" प्रमिता० । "एष भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः । अत्रापमण्डले वा स्वकाधारैव यस्य तस्यैवेति" सि०शि० ।

**अपमर्द्द** पु० अप+मृद–घञ् । विमर्द्दने "हयहस्तिकरीषाभ्यामपमर्द्दः कृतोमहानिति" रामा० ।

**अपमान** पु० अपकृष्टं मीयतेऽनेन अप+मा–करणे ल्युट् । अनादरे "अपमानं पुरस्कृत्य स्वकार्य्यं साधयेन्नर" इति नीतिः । "मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयो" रिति" गीता । वेदस्य ब्राह्मणानाञ्च अपमानादधोगतिः पुरा० अपकृष्टोमानो यस्मात् अप+मन–करणे घञ् वा । अनादरे पु० । नापमानः प्रयोक्तव्यः कामक्रोधकृतः क्वचिदिति" रामा० । "अथापमानेन पितुःप्रयुक्तेति" कुमा० ।

**अपमानित** त्रि० अपमानं जातमस्य तार० इतच् । यस्यापमानं कृतं तस्मिन् कृतापमाने अनादृते । [सितवर्त्मनि ।

**अपमार्ग** पु० अपकृष्टो मार्गः प्रा०स० वा कृष्टलोपः । कुत्-

**अपमार्जन** न० अप+मृज–भावे ल्युट् वृद्धिः । संशोधने । "कांस्यापमार्जनमसीमधुरं सैन्धवं नतमिति" सुश्रुतः अधस्तान्मार्जने च । अपमार्जनप्रोक्षिताभ्यामपसृष्ट इति कात्या० ६,१०,४ । "अपमार्जनं ग्रहपात्रमुखादारभ्याधस्तादपमार्जनमिति" तद्व्या० ।

**अपमित** त्रि० अप–मा–क्त । अवज्ञाते अनादृते ।

**अपमित्यक** न०अपमित्य अपमानमङ्गीकृत्य गृह्यते कन् । ऋणे

**अपमुख** न० अपगतं पराभूतं मुखम् प्रा०त० । पराङ्मुखे वदने प्रा०ब० गतलोपः । पराङ्मुखवदनवति पदार्थे त्रि० ।

**अपमूर्द्ध** त्रि० अपगतो मूर्द्धा यस्य । शिरःशून्ये कबन्धे ।

**अपमृत्यु** पु० अपकृष्टः दुष्टहेतुजन्यत्वेन मृत्युर्मरणम् । विषोद्बन्धनादिहेतुके मृत्यौ । "अपमृत्युहेतवश्च शुद्धिपक्षे कौर्म्मे दर्शिता यथा